International Journal of Sanskrit Research 2024; 10(5): 20-22

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(5): 20-22
© 2024 IJSR
www.anantaajournal.com
Received: 22-06-2024
Accepted: 28-07-2024

**डः.सस्मिताबन्दरनायकः**
सहायिकाचार्या
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**डः.सस्मिताबन्दरनायकः**
सहायिकाचार्या
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा, भारत

# गोपबन्धुदर्शने आत्मतत्त्वसमीक्षणम्

## डः.सस्मिताबन्दरनायकः

**सारांश**
दार्शनिकानां खलु सुखप्राप्तये दुःखपरिहाराय प्रवृत्तिर्बलवती दृश्यते। यद्यपि आत्मतत्त्वनिर्द्धारणं तु वास्तविकं बहुकष्टसाध्यं तथापि शास्त्रेभ्यः सारं संगृह्य किमपि दिङ्मात्रं प्रदर्श्य पश्चाद् गोपबन्धुमतं प्रदर्शयामि। अत्-धातोः मनिन्-प्रत्यये कृते आत्मन् इति शब्दः निष्पद्यते। यद्यपि आत्मा परंब्रह्मवाचकः तथापि यस्य सामान्यार्थे लौकिके जीवक्रियात्मशक्तिरात्मशब्देनोच्यते। तत्तद्दर्शनानुसारं शास्त्रकारैः आत्मतत्त्वस्य बहुविश्लेषणात्मकं विवरणं प्रस्तुतीकृतम्। वैदिकवाङ्मये ब्रह्मात्मशब्दौ यद्यपि पृथगर्थपरौ प्राप्येते तथापि तयोः पूर्णतया स्वातन्त्र्यं पार्थक्यं च वक्तुं न शक्यते । उपनिषत्सु आत्मा पूर्णः अखण्डश्च । स च सदसतोः, अणुबृहतोः, बाह्यान्तरयोः, अन्येषां च समग्रधर्माणामाश्रयः । आत्मा अविद्योपधानेन जीवभावं प्रतिपद्यते तात्त्विके भेदो नास्तीति शांकरा मन्यन्ते। द्वैते सर्वत्र आत्मैव परमेश्वरो मन्यते। तत्र चार्वाकाः देह एव आत्मा, उपभोगो जीवस्य लक्षणममिति जैनाः। अत्र जीवा अनन्ताः देहपरिमाणविशिष्टाः, बद्धमुक्तभेदेन द्विविधाः। तत्र कुत्रापि शून्यं कुत्रापि स्कन्धपञ्चक्विशिष्टमात्मस्वरूपमिति बौद्धाः संगिरन्ते। शङ्कराचार्यनये आत्मनः अस्तित्वविषये साक्षात्प्रमाणस्यावश्यकता नास्ति। यतो हि युक्तिप्रमाणापेक्षया अनुभूतिरत्र बलिष्ठं प्रमाणम् । केनाऽपि एवं वक्तुं न शक्यते यत् अहं नास्मीति । भाष्यधिया- 'न हि अग्नेरौष्ण्यमग्निना निराक्रियते, तथाहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतरं चाज्ञासिषमहमेवानागतमवगततरं च ज्ञास्यामात्यतीतानागतवर्तमानभावनाऽन्यथा भवत्यपि ज्ञातव्ये न ज्ञातु नान्ययाभावोऽस्ति, सर्वदा वर्तमानस्वभावत्वात्। [1] इत्यत्र आत्मनः सत्ता सिद्धा । आत्मा विषयी विषयश्च भवति । आत्मा तत्त्ववेत्ता इत्यनेन तस्य आत्मनः विषयित्वं ज्ञायते । पुनः प्राप्तव्यत्वात् स आत्मा विषयस्वरूपो भवति। अत एव 'आत्मा वाऽरे द्रष्टव्यः श्रौतव्यः मन्तव्यः निदिध्यासितव्यः[2] इति उपदिश्यते। आत्मस्वरूपनिर्णये सांख्ययोगवादिनः यथा- 'प्रमेयसिद्धिः प्रमाणसिद्धिः'[3] प्रमाणद्वारा प्रमेयरूपः पुरुष एव आत्मेति स्वीयाभिमतं प्रकटयन्ति। सांख्ये पुरुषो नैकः, किन्तु बहवः । योगे आत्मा ईश्वरो नाम । कर्मफलानां भोक्ता पुनर्भवगामी आत्मैव मीमांसानये जीवः। नैयायिकाः आत्मनः द्वैविध्यं मन्यन्ते । जीवात्मपरमात्मभेदात् । परमात्मा एकः जीवस्तु बहवः ।ब्रह्मणः अस्तित्वे प्रमाणानाम् अस्तित्वसिद्धिर्जायते । परन्तु प्रमाणानाम् अस्तित्वसिद्धौ ब्रह्मणः अस्तित्वसिद्धिर्न भवति । यदि आत्मा आत्मानुमानादिप्रमाणगम्यः इति स्वीक्रियते चेत्, तन्न समीचीनम् । यतो हि आत्मनः प्रकाशेन अस्तित्वेन च प्रमाणानां सिद्धिर्जायते। तत्र अनुमानादिप्रमाणानि कथं स्वाश्रयभूतात्मनः प्रकाशकानि भविष्यन्ति। अतः केनापि प्रमाणेन आत्मसिद्धिर्न जायते।

**कूटशब्दाः**- आत्मा, परंब्रह्म, जीवः, भोक्ता, चेतनः, अपरिच्छिन्न

### गोपबन्धुदृष्ट्या आत्मतत्त्वविनिर्णयः

गोपबन्धुः प्रायतः शंकरमतमनुसरति । तद्दर्शने स्थूलसूक्ष्मपदार्थविशेषान् आत्मैव प्रकाशयति । आत्मा अनुभवस्वरूपः अननुभाव्यश्च । आत्मा तु चेतनः सच्चिदानन्दस्वरूपः स्वयंप्रकाशश्च । आचार्यशङ्करस्य मतानुसारम् आत्मनः अस्तित्वविषये प्रमाणस्यावश्यकता नास्ति।

अस्य मतेन केनाऽपि एवं वक्तुं न शक्यते यत् अहं नास्मीति। अतः आत्मनः अस्तित्वं निराकर्तुं न शक्यते। सर्वेषां जीवानां मध्ये एकैव आत्मा विराजते इति गोपबन्धुना स्वाभिमतं 'कारा कवितायां' प्रकटितम्। तद्यथा - 'वेनि पिण्डे एक आत्मा एक मन प्राण। वेनि हृदे एक तन्त्रे वाजे समतान' ।।[4] इति। अर्थात् प्रतिजीवानां शरीरे एकात्मा, एकमनः, एकप्राणाः च विराजन्ते। उभयोः हृद्स्पन्दनमेकवारमेव जायते।

यदा जीवात्मा शरीरं त्यक्त्वा अन्यत्र गच्छति, नूतनकायां विधारयति तदा केवलं पञ्चमहाभूतविशिष्टशरीरं तिष्ठति । तस्य चेतनशक्तिः तदा न विद्यते । उक्तं यत्-
गला से अमर आत्मा छाडि मरकाया । आच्छादिला चउदिगे विषादर छाया ।।[5] अपि चान्यत्र- 'पड़िअछि पिण्ड याइछि पराण । देखिले ए दशा वढ़े बुद्धि ज्ञान' ।।[6] इति ।
अमरात्मा शरीरं त्यक्त्वा गच्छति । तत्र केवलं प्राणविहीनः मृत्पिण्डः तिष्ठति । एतस्य दर्शनेन जनानां बुद्धिः पारमार्थिकज्ञानं वा वर्धते । वस्तुस्थित्या आत्मस्वरूपं किम्भूतमिति ज्ञातुं नचिकेता यमं प्रति प्रश्नं पृच्छति- कहे नचिकेता, मने लागे मो सन्देह । कि हुए मानव ? येवे तेजे मरदेह ।[7] अर्थात् नचिकेताः यमं पृच्छति मम मनसि प्रश्नः आयाति यत्- 'यदा आत्मा शरीरं त्यजति तदा किं भवति? एवञ्च नचिकेताः वदति, आत्मविषयकज्ञानं मम तु सामान्यरूपेण वर्तते । यथा जनाः वदन्ति तदनुसारम् । केचन वदन्ति आत्मा शरीरं त्यक्त्वा परलोकं गच्छति। केचन पुनः तत् नाङ्गीकुर्वन्ति । परन्तु वास्तवदृष्ट्या आत्मा अस्ति न वा ? अयं प्रश्नः सर्वदा मनसि अङ्कुरितः भवति । यमः उत्तरं प्रयच्छति- आत्मतत्त्वविषयकज्ञानप्रदातारः संसारे विरलाः सन्ति । यद्वा भवतु अहं तुभ्यं गूढरहस्यं वदामि ध्यानेन शृणु । यमः वदति ब्रह्म-आत्मनोर्मध्ये भेदः नास्ति । उक्तं यत्- ब्रह्म आत्मा वेनि मध्ये नाहिँ भेदाभेद । ये आचार्य जाणन्ति ए गूढ सार भेद ।।[8] इति ।
प्रसङ्गेऽस्मिन् प्रत्युत्तरेण नचिकेतसं वदति यमः- अभेदात्मा मानवानां हृदये विराजते, परन्तु तद्दर्शनं दुःसाध्यमेव । केवलं सिद्धयोगिनः एव द्रष्टुं समर्थाः भवन्ति । प्रतिपादितं कविना नचिकेतोपाख्याने-
पूरि रहिअछि आत्मा विश्व अभ्यन्तरे । विद्यमान मानवर हृदय कन्दरे ।। दुःसाध्य कठिन अति आत्मदरशन । देखन्ति आध्यात्म योगे सिद्ध साधुजन ।।[9] इति ।
अयमात्मा विश्वाभ्यन्तरे सर्वत्र विद्यमानोऽस्ति, मानवस्य हृदयगह्वरे च । परन्तु तस्य दर्शनं दुःसाध्यं कठिनश्च । ये योगिनः साधनं कुर्वन्ति, ते योगबलेन द्रष्टुं पारयन्ति । आत्मा द्विविधः । जीवात्मा, परमात्मा चेति । नैयायिकमतमपि गोपबन्धुना समर्थितम्। तदाह-
'जन्म विरहित आत्मा नित्य सनातन । निर्विकार शाश्वत से सर्वदा नूतन ।। विश्व वस्तु रन्ध्र आत्मा सुप्रकाश । शरीर विनाशे आत्मा याए नाहँ नाश' ।। [10] इति ।
'परमात्मा जीव आत्मा एकत्र उभये । प्रविष्ट मानव बुद्धि गूढ गुहाशये' ।।[11] इति । एभिः प्रमाणैः जन्ममरणरहितात्मा नित्यः, सनातनः, निर्विकारः, नित्यनूतनश्च । वस्तुनः आभ्यन्तरे स्थित्वा आत्मा प्रकाशितः जायते । शरीरविनाशे आत्मनः विनाशः न भवति । परमात्मा जनानां हृदये विराजते तदा जीवात्मारूपेणाभिधीयते । परन्तु जीवनाशेऽपि आत्मनः नाशो न भवति । सूक्ष्मोऽपि स सर्वत्र व्यापकः । भवति । देशकालादिभिरपरिच्छिन्नः । उक्तं च-
'सूक्ष्मतम परमाणु तहिँ सूक्ष्माकार । बृहत्तमुँ बृहत्तम आत्मार विस्तार ।। देश काल गुणे नुहैं आत्मा परिच्छन्न । सर्वव्यापी सर्वेश्वर सर्वापर भिन्न' ।।[12] इति आत्मतत्त्वविषये गोपबन्धुवचनं वरीवर्ति ।

## समीक्षणम्

आत्मा परमाणुतः सुक्ष्मः, बृहत्त्वाद् बृहत्तमः सर्वव्यापी सर्वेश्वरः सर्वेभ्यः अपरश्चेति उच्यते । आत्मज्ञानार्थं साधनमावश्यकम् । तदतिरिच्य केवलं पठन-पाठनेन तत्साक्षात्कारो नैव जायते । इदमवबोधयितुं गोपबन्धुना उक्तम्-
'मिले नाहिँ आत्मलाभ शास्त्र अध्ययने । शास्त्रार्थे श्रवणे अवा केवल धारणे ।। आत्मार स्वरूपज्ञाने करे ये साधना । दूरे परिहरि हहुँ सकल कामना' ।।[13] अर्थात् केवलमात्मधारणेन, शास्त्राध्ययनेन, शास्त्रार्थेन, शास्त्रश्रवणेन वा आमदर्शनं न प्राप्यते । यः आत्मस्वरूपज्ञानार्थं साधनमाचरति, तस्यैवात्मदर्शनं भवति । आत्मदर्शनेन सकलकामनाः विनश्यन्ति । सृष्टिः स्थितिः लयश्च सर्वमात्माधीनमेव । प्रतिपादयितुमुक्तं गोपबन्धुना-
'आत्मा अन्तर्भूत सृष्टि संस्थिति प्रलय । लोके याहा विपर्यय नुहँ ता विलय ।। एसन स्वरूप आत्मा यहिँ विद्यमान । दुःसाध्य साधने लभ्य से निगूढ स्थान' ।।[14] इत्यत्र लोके यो विपर्ययः, सः विलयो न । एवं स्वरूपयुक्तात्मा यत्र विद्यमानः, तत् स्थानं दुस्साध्यसाधनेन प्राप्तुं शक्यते । जीवात्मा इन्द्रियादीनाम् अधिपतिः भवति । मन-बुद्धि-इन्द्रियादिपरिचालनैः कार्याणि साधयन्ति । उक्तं यत्-
'जीवात्मा इन्द्रिय आदि सर्वोपरि सार । मन बुद्धि इन्द्रियादि यार परिचार' ।।[15] अर्थात् मन-बुद्धि-इन्द्रियादीनां मिश्रितस्य परिवारस्य साररूपेण जीवात्मा विद्यते ।

## उपसंहार

परमात्मा सर्वभूते विद्यमानः । भूगर्भे उज्ज्वलरत्नमिव भवति । यथा मृत्तिकावरणे सति रत्नस्य उज्ज्वलता प्रस्फुटिता न जायते, तथैव सामान्यजननेत्रे परमात्मनः स्वरूपं न भासते । एतत् स्पष्टयितुं निगदितं कविना- 'परमात्मा सर्वभूते छन्ति विद्यमान । भूगर्भे उज्ज्वल रत्न सम्पद समान ।। मृत्तिकार आवरणे थिले रत्नराशि । न दिशइ जननेत्रे येसने उन्द्रासि' ।।[16] इति ।
गोपबन्धुविरचितं 'नचिकेतोपाख्यानं' सम्पूर्णरूपेण आत्मतत्त्वविषयकमस्ति । सुस्पष्टं सरलया भाषया आत्मनः स्वरूपमत्र उपस्थापितम् । सामान्यजनोऽपि ज्ञातुं शक्नोति । परन्तु वास्तविकस्वरूपं केवलं साधनया एव ज्ञातुं शक्यते । इति शम् ।

## सहायकग्रन्था


1. ब्र.सू.शां.भाष्यम्
2. बृ.उ.-२/४/५
3. सां.का.
4. का.क.-पृ-१५२
5. तत्र-पृ-११६
6. व.आ.पृ-१७३
7. न.उ.पृ-२५५
8. तत्र,पृ-२६३
9. तत्र-२६४
10. न.उ.पृ-२६७
11. तत्र-पृ-२७०
12. तत्र-पृ-२६८
13. तत्र-पृ-२६९
14. तत्र-पृ-२७०
15. तत्र-पृ-२७४

16. तत्र-२७४
17. ब्रह्मसूत्रम्, शाकरभाष्यम्, श्रीमद्भगवद्गीता, बृहदारण्यकोपनिषद्, सांख्यकारिका, काराकविता, गोपबन्धुरचनावली, नचिकेता उपाख्यान, ऋग्वेदः, छान्दोग्योपनिषद्, श्वेताश्वतरोपनिषद्, अथर्ववेदः